।। अथ त्रिपंचाशत्तमो ऽध्यायः ।। Chapter-53

वसिष्ठ उवाच- ततो गच्छेन्नृपश्रेष्ठ विख्यातां सर्वमंगलाम् ।।
दृष्ट्वा यां मानवो भक्त्या मंगलायतनं व्रजेत्[1] ।। १

पुरा मंकणको नाम ऋषिरासीन्महातपाः ।।
स क्वचिन्नैमिषारण्यात् श्रीमालं द्रष्टुमुद्यतः[2] ।। २

विगाह्य सर्वतीर्थानि दृष्ट्वा देवीं हरिप्रियाम् ।।
उत्तरादिशमास्थाय मुनिर्ध्यानपरोऽभवत् ।। ३

हर्षपूर्णेक्षणो धीमान् श्रीमालं च ययौ मुदा ।।
बद्धाञ्जलिपुटो[3] भूत्वा श्रीमालं प्रत्यभाषत ।। ४

दृष्टानि सर्वतीर्थानि सर्वे देवा नमस्कृताः ।।
सर्वत्रापि स्थिता लक्ष्मीः पुनरत्रैव दृश्यते ।। ५

न द्रुमो न लता नाश्मा न च कश्चिज्जलाशयः ।।
दृश्यते रहितो लक्ष्म्या श्रीमालेऽत्र कथंचन ।। ६

वसिष्ठ उवाचः- इत्येवं भाषमाणस्य मुनेस्तस्य महात्मनः ।।
आविर्भूता जगन्माता कुमारी रूपधारिणी ।। ७

-०-

१ बी भवंत्
२ ए दृष्टुमुद्यतः
३ ए ली

द्विप्राणा डिम्भमुत्संगे कृतकौतुकमंगला ।। ८

कुमार्युवाच :- किमुच्यते त्वया ब्रह्मन् वाष्पसंभृतचक्षुषा ।।
तन्मे कथय चेत्साध्यं तवास्ति सर्वजंतुषु ।। ६

मंकण उवाच :- दृष्टानि सर्वतीर्थानि सर्वे देवा नमस्कृता: ।।
सर्वत्रापि स्थिता लक्ष्मीर्पुनरत्रापि दृश्यते ।। १०

न द्रुमो न लता नाश्मा न च कश्चिज्जलाशय:[1] ।।
दृश्यते रहितो लक्ष्म्या श्रीमालेत्र कथंचन ।। ११

कुमार्युवाच :- पुनरत्राभ्दुतं[2] पश्य यन्न दृष्टं त्वया पुरा ।।
अहं कुमारी पुत्रोऽयं जातो मम पतिं विना ।। १२

मंकण उवाच :- किमसम्बद्धमेणाक्षि[3] कुमारि प्रोच्यते त्वया ।।
न जातु ब्रह्मण: सृष्टिरेवं दृष्टा श्रुताथवा ।। १३

कुमारिकोवाच :- एवमेव मवेद्विप्र सदापत्यमिदं मम ।।
चरणाभ्यां विना याति जगत्तदिदमुच्यते ।। १४

-o-

१ ए ज्जलाशय:
२ ए भ्दु
३ ए न्ध

वसिष्ठ उवाच :- इत्थं मंकणाको नाम कन्यावाक्यं निशम्य च
मनसा चिन्तयामास संप्रहृष्टतनूरुह: ।। १५

उत्पद्यते जगद्यस्या: कुमार्या: पत्ययोगत: ।।
सेयं देवी न संदेह: श्रीमालस्यापि देवता ।। १६

दृश्यामून्मम संतुष्टा श्रीमालस्य प्रशंसनात् ।।
तदिमामीश्वरीं स्तौमि देवानामपि दुर्लभाम् ।। १७

उत्थाय बद्धाञ्जलिर्मूर्ध्नि विस्मयोत्फुल्ललोचन: ।।
देवीं मंकणाको नाम तुष्टाव परमेश्वरीम् ।। १८

मंकण उवाच :- धातासि देवदेवेशि कुमारीरूपधारिणी ।।
विधायापत्यरूपेण जगदुत्संगमागता ।। १९

अपत्यं विश्वमेतत्ते नकश्चित्ते मतिर्मत: ।।
त्वत्पति: पालनाद्देवि लोकानामपि सर्वदा ।। २०

त्वं श्रीस्त्वं स्वधास्त्वं स्वाहा त्वं गौरी शंकरप्रिया
सावित्री देवि माता त्वं क्रिया त्वं क्रतुराजिष्णु ।। २१

-०-

३ बी निधाया
२ ए दर्णी
१ ए तदी

धृति: शान्ति: परा प्रीति: ह्रीर्दया सन्ततिस्तथा ।।[1]
बुद्धिर्बोधात्मिका[2] देवि ध्यानाद्भिरतिराजैवम् ।। २२

रूपाणितव विश्वेशि प्रसीद परमेश्वरि ।।
अत्र तीर्थाविगाहेन[3] देवानां दर्शनेन च ।। २३

निर्द्धूतकल्मषां मत्वा मां त्वं प्रत्यक्षतां गता ।। २४

देव्युवाच :- वरदास्मि परिज्ञानात्तव विप्रा वरं वृणु ।।
एवं कश्चिन्न मां वेत्ति त्वया ज्ञाता यथा धुना ।। २५

मंकण उवाच :- स्थितिमत्र कुरु प्रीत्या मम लोकहिताय वै ।।
मंगलानि प्रयच्छन्ती सर्वेभ्य: श्रद्धयार्चिता[4]:।। २६

देव्युवाच :- मंगलानि करिष्येऽहं नृणामत्र स्थिता द्विज ।।
अत: ख्याता भविष्यामि नाम्नाहं सर्वमंगला ।। २७

यो मामिह स्थितां भक्त्या मानव: पूजयिष्यति ।।
मंगलानि करिष्यामि कुले तस्याहमन्वहम् ।। २८

-o-

१ घ ह ह्रीर्दयासम्मतिस्तथा

२ घ ह मेधात्मिके

४ ए श्रद्धयाचिता

३ ए तीर्था

अष्टम्यां वा नवम्यां वा चतुर्दश्यामथापि वा ।।
आर्ता ये मां नमस्यन्ति न तेषामापद: क्वचित् ।। २६

वसिष्ठ उवाच :- इत्युक्त्वान्तर्दधे देवी कृत्वा तत्रांशत: स्थितिम् ।।
तत: प्रभृति भूपाल श्रीमाले सर्वमंगला ।। ३०

वरदाराधिता पुंसां कुरुते मंगलानि वै ।।
यश्चैतच्छृणुयान्नित्यं पठेद्वापि समाहित: ।। ३१

तस्य देवी प्रसन्नास्यात् सर्वदा सर्वमंगला ।।
वरदाराधिता पुंसां सदा भवति निश्चितम्[1] ।। ३२

-०-

इति श्री सर्व मंगलामहात्म्यं ।। ५३ ।।

१ बी वरदाराधितां पुंसा कुरुते सर्व मंगलों, खी ई कुरुते मंगलानिर्व खी प्रतों, यश्चैतच्छृणुयान्नित्यं पठेद्वापि समाहित: ।।

तस्य देवी प्रसन्ना स्यात् सर्वदा सर्वमंगला ।।
इत्वे तावानधिक: पाठ: ।।

-०-